# सुरेन्द्रनाथमहाविद्यालयस्य

## संस्कृतविभागस्य

## इ-पत्रिका

# प्रभा



# इ-पत्रिका


प्रकाशकालः

मार्चमासः,२०२१

प्रथमप्रकाशः



सम्पादकः

ड. स्वपन-माझिः



प्रकाशकः

सुरेन्द्रनाथमहाविद्यालयस्य

संस्कृत-विभागः

कोलकाता

# सम्पादकीयम्

प्रत्येकं प्रतिष्ठानस्य स्वकीया सत्ता वर्तते । वर्तते च स्वकीया परिकल्पना,शिक्षाविषये विशेषा नीतिः, विशेषः आदर्शः, विशेषा च भावना । सुरेन्द्रनाथमहाविद्यालयस्यापि तादृशः आदर्शः अस्ति , अस्ति च शिक्षार्थिनां सम्भावनायाः व्यक्तकरणाय प्रयासः ।

सुरेन्द्रनाथमहाविद्यालयस्य संस्कृतविभागस्य प्रभा-नाम्नी 'E Magazine' इति प्रकाश्यते। एकतः करोनायाः करालग्रासः मानवानां जीवनं सङ्कटमयं विदधाति,अपरतः विश्वविद्यालयस्य परीक्षया छात्राः तथा शिक्षकाः शिक्षिकाश्च अतीव व्यस्ताः जायन्ते। तथापि स्वल्पसमयाभ्यन्तरे छात्रैः छात्राभिः प्रदत्ताः कविताः प्रबन्धाः अत्र सङ्कलिताः । छात्राणां नवीना चिन्ता अत्र प्रतिकलिता। अस्माकं संस्कृतविभागस्य अध्यापकेन अध्यापिकाभिश्चापि अत्र लेखाः प्रदत्ताः। 'E Magazine ' इति पत्रिकायाः प्रकाशनाय आदौ उद्योगिनः भवन्ति अस्माकं महाविद्यालयस्य अध्यक्षाः ड.इन्द्रनील-कर-महाभागाः । तेषां प्रेरणया अस्माकं प्रयासोऽयम्।अपि च, महाविद्यालयस्य आभ्यन्तरीण-मूल्यायननिर्धारकायोगस्य 'IQAC' इत्यस्य आह्वायिका ड. सुचन्द्रा-च्याटार्जिमहाशया अपि सर्वदा साहाय्यकरं प्रसारयति। किञ्च, संस्कृतविभागस्य अध्यापिकानामपि अवदानम् अनस्वीकार्यम् । सर्वेषां प्रयत्नेन प्रयासोऽयं प्रकाश्यते। पत्रिकायां यदि कापि त्रुटिः स्यात् तर्हि क्षम्यताम्। सारस्वतसाधनायां व्रतिनां परितोषविधानं चेत् तर्हि नैवेद्यमिदं सार्थकं स्यादिति प्रत्याशा ।

# সূচিপত্রম্


১. মঙ্গলাচরণম্

২. চিত্র অঙ্কন — সুপ্রিয়া সরদার

৩. চিত্র অঙ্কন — প্রণব হালদার

৪.আগন্তুকঃ — ড. স্বপন-মাঝিঃ

৫. মম বঙ্গপ্রদেশঃ — অনুশ্রিতা-মণ্ডলঃ

৭. কেদারনাথঃ — শ্রীপর্ণা-বাসুঃ

৮. গ্রন্থঃ — সুনন্দা জানা

৯.স্বামী বিবেকানন্দঃ — শুভম-চক্রবর্তী

১০. উন্মাদ ধরণী — অনুপ কুমার মন্ডল

১১. মেয়েদের আসল বাড়ি — জবা দাস

১২. YOUR BEST — Sumona Deoyali

১৩. কামনা — সাবানা খাতুন

১৪. দাবি — শুভম চক্রবর্তী

১৫. শীতের ঝোড়ো পাতা — সুস্মিতা দাস

১৬. কোয়ারান্টাইন — ফয়জুল্লা সরদার

১৭. সময়ের মূল্য — অহনা নন্দন

১৮. অচেনা প্রেম — মাসুমা পারভিন

১৯. বীণাপাণির বিজয়রথ — সমীরণ মন্ডল

২০. আমি একটা কন্যা ভ্রুন — সুপর্ণা গায়েন

২১. পৃথিবীটা কেমন — হিরন্ময় মন্ডল

২২. আক্ষেপ — সুমাত্রা কয়াল

২৩. মা আমার মা — সুমিতা বারিক

২৪. নারী — মিতা মন্ডল


मङ्गलाचरणम्
ऊँ सह नाववतु ,
सह नौ भुनक्तु ,
सह वीर्यं करवावहै ।
तेजस्वि नावधीतमस्तु ,
मा विद्विषावहै ।।
ॐ शान्तिः शान्तिः शान्तिः।

# সুপ্রিয়া সরদার,দ্বিতীয় বর্ষ



TITLE - VILLAGE
MEDIUM - WATER COLOUR
SIZE - 12X 16 INCH

প্রণব হালদার , প্রথম বর্ষ



# आगन्तुकः

ड. स्वपन-माझिः

कस्याश्चन बालिकाया जीवनचरितम् आचर्यते। सुनन्दानाम्नी सा। सा खलु नवमश्रेण्यां पठन्त्यस्ति। इतः पूर्वं तया समाहितचित्तेन स्वीयं पठनकार्यं विधीयते, परीक्षायाञ्चापि उत्तमफलं प्राप्यते। सम्प्रति सा पठनकर्मणि मनो निवेशयितुमक्षमा। किं कारणं तस्याः, येन खलु पठनकालेऽसौविध्यमेवानुभूयते तया। वस्तुतः तत् कारणं प्रायशः समेषान्तेवासिनां जीवने संघटते।

सुनन्दायाः पठनार्थं गृहमेकं निर्दिष्टम् अस्ति। प्रातः सप्तवादनतो नवमवादनं सायञ्च षड्वादनतो दशमवादनं यावत्तया तत्र पठ्यते। पठनकाले प्रायः तदीया जननी रक्षयित्रीरूपेण तत्-पार्श्वेउपविशति। मातुः शासनभीवशात् सुनन्दया सम्यक् पठनं क्रियते। परन्तु माता गृहकर्मार्थं बहिर्याति तदा किञ्चित् समयात् परं कश्चिदागन्तुको निःशब्दं तदीयगृहेमभिनिविशते। तमवलोक्य तस्या भयम् उत् पद्यते। सा आगन्तुकं वदतु- त्वं पुनरायासि? त्वं न जानासि - परीक्षा मे द्वारं खट्-खटायते। समयविषये तव ज्ञानं नास्ति खलु? पठनकाले पुनः पुनः आगम्यते चेत् परीक्षायामुत्तमफलं न प्राप्स्यते। सर्वेऽपि मयि न स्निह्येयुः। इतःपूर्वं तवागमनात् विद्यालये शिक्षकसमीपे सम्यक् पाठो न प्रदीयते मया। विद्यालयेऽपि वर्गसमये त्वं मम सविधमाजिगमिषसि। तेन शिक्षकोऽमनोयोगहेतोः मां दण्डयति। मदीयौ च पितरौ अपि आह्वयति। शिक्षकेण पितरौ प्रति सर्वं निगद्यते। तन्निशम्य तौ मां दण्डयतः। किञ्च एकदा माता त्वां निशाम्य मा दण्डेन दण्डयति। जननी मम पार्श्वे उपविशति चेत्त्वं नायासि। आम्, सत्यम्, त्वं मातुः विभेषि। त्वया मदीयं वचनं न श्रूयते, सर्वदा सर्वथा च पठनकाले एव आगम्यते। भो आगन्तुक:! त्वमनुरुध्यसे मया - अधुना नोपेत्य परीक्षायाः परमेवायाहि। तदा न कोऽपि त्वं वारयेत्। कियतो दिवसान् यावत्मामुत्सृज्यायासेन कालं नय। ततः तवागमनं निर्बाधमेव स्यात्। स आगन्तुकः तथा कुरुते। उच्यताम् - कः स आगन्तुकः? इति शिवम्।

# मम वङ्गप्रदेशः

अनुश्रिता-मण्डलः

वङ्गभाषीयाः जनाः मे परमीष्टाः
मम प्राणानां प्रेयः वङ्गे यः सृष्टः ॥
वयं वङ्गीयाः सर्वे वङ्गमातुः सन्तानाः
वङ्गभूमेः वायु-अद्भ्याम् सृष्टाः नः प्राणाः॥
नः नृत्यगीतानि नः कायाः च भाषाः
वङ्गभूमेः जलमृत्तिकाभिः निर्मिताः ॥
अरे! वयं वङ्गीयाः वयं वङ्गीयाः
सत्य-ऐक्य-आनन्दे दीपान् ज्वालयामः ॥
ज्ञानव्रतं श्रमव्रतं सदा पालयामः
एवमेव शरदः शतम् खलु जीवामः॥
पुष्पस्य हसनं च चटकस्य गानम्
दृष्ट्वा परिपूर्णम् वङ्गीयानां जीवनम् ॥
मातृभूमिः अस्माकं धर्मश्च सम्मानम्
वङ्गभूमिः अस्माकं स्वर्गसमस्थानम् ॥
वङ्गभूमेः छन्दसः पालनेन मानम्
दास्यामः विश्वे विशिष्टतमदानम् ॥

# केदारनाथः

श्रीपर्णा-वासुः

शिवः सनातनधर्मस्य प्रमुखः देवः अस्ति । सः एव विश्वनाथकोऽस्ति। स भस्मेन अवलिप्तः। तस्य त्रीणि नेत्राणि सन्ति। स स्वजटासु गङ्गा मुकुटे च शशिनं धरति। तस्य करे डमरु-त्रिशुलश्च शोभते। त्रिशुलः त्रिगुणान् निर्दिशति। शिवः व्याघ्रचर्म वस्त्रमिव परिगृह्णाति। स पञ्चाननः इति नाम्ना अपि प्रसिद्धः। 'शिवम् ' इति विशेषणवाचकशव्दस्य अर्थः हि - शुभं मङ्गलं च। ' शिवः ' इत्यस्य अर्थः मङ्गलमयः इति ।

केदारनाथ-ज्योतिर्लिङ्ग द्वादश- ज्योतिर्लिङ्गेषु अन्यतमम् अस्ति। एतदेकं प्राचीनं शिवक्षेत्रम् । हिमालये केदारनाथः यत्र अस्ति तं भागं ' रुद्रहिमालयः ' इति वदन्ति। अयं पर्वतः 'सुमेरुवर्वतः', 'पञ्चपर्वतः' इत्यपि उच्यते । अत्र रुद्रहिमालयः, विष्णुपुरी, ब्रह्मपुरी , उद्गरिकान्ता , स्वर्गारोहणम् इति पञ्च-पर्वताः सन्ति । अतः अस्य नाम ' पञ्चपर्वतः ' इति । गन्धमादनः रुद्रहिमालयस्य कश्चन भागः। नरनारायणमन्दिरस्य गीपुरं स्वर्णनिर्मितमस्ति। पादपरिमितो-न्नतप्रदेशे गर्भगृहे सिंहासन-स्योपरि शलग्रामशिलायाः पूर्वाभिमुखः श्रीनारायण-विग्रहः

अस्ति। योगमुद्रास्थितः किरीटधारी पद्मासनस्थः बद्रीनाथः अस्ति। अस्मिन् स्थाने स्थितं शिवक्षेत्रं ब्रह्मकपालनाम्ना निर्दिश्यते। वेदव्यासमहर्षिः अत्र स्थितवान्। श्री शङ्कराचार्यः अत्रैव स्थित्वा भाष्यग्रन्थान् रचितवान्। महर्षिः श्री वेदव्यासः महाभारतम् अत्रैव रचितवान्। गणपतिः अत्रैव तत् लिखितवान् इति विश्वासः। हृषीकेशतः रुद्रप्रयागपर्यन्तम् आगत्य अग्रे केदारनाथक्षेत्रं गन्तुं

शक्यते। एतत् हृषीकेशतः २४० किलोमिटारमिते दूरेऽस्ति। सर्वतः हिमाच्छादितानि गिरिशिखराणि सन्ति । केदारनाथ-प्रदेशं रुद्रहिमालयः इति कथयन्ति । सुमेरुपर्वतः गन्धमादनगिरिः च अस्यैव भागौ स्तः। केदारनाथक्षेत्रं द्वादशज्योतिलिङ्गक्षेत्रेषु अन्यतमम् अस्ति।

# ग्रन्थः

सुनन्दा-जाना

ग्रन्थन्-शब्दात् ग्रन्थशब्दः जातः,यस्य अर्थः भवति ग्रन्थनम्। पुराकाले तालपत्रस्य उपरि पुँथिः लिपिवद्धा आसीत्। समानरूपेण तालपत्राणां कर्तनं कृत्वा रज्ज्वा ग्रन्थस्य बन्धनं कृतम्। भारतेतिहासं पर्यालोच्य दृश्यते पाठेन सह पुँथेः सम्बन्धः परस्य विषयः।कारणं यथा वैदिके गुरुमुखात् श्रुत्वा छात्राः पाठं कण्ठस्थं कृतवन्तः। फलतः तत्र ग्रन्थेन प्रयोजनं नास्ति गुरुरेव आसीत् जीवितः ग्रन्थः। परवर्तिनि काले छात्राः अपि एकशः जीविताः ग्रन्थाः अभवन्। अस्या पाठपद्धतेः ग्रन्थपाठपद्धतिः मात्रागतभावेन न्यूनतरा। कारणं यत् गुरुमुखात् यदा श्रूयते तदा स्वरोच्चारणविधि-आङ्गिकोपवेशनविधिसमूहं छात्राः गृहीतवन्तः। किन्तु परवर्तिनि काले ग्रन्थलेखनेन प्रयोजनं भवति यत् दूरस्थितानां जनानां ज्ञापनार्थम् अथवा संशये सति संशयदूरीकरणाय ग्रन्थस्य आवश्यकता स्यात्। एतदपि तस्मिन् समये प्रतिलिपिकाराणां नानाविधाः भ्रमभ्रान्तिसंशयाः च जायन्ते स्म। प्राचीनभारतस्य ग्रन्थम् अवलम्ब्य आलोचना खलु स्वतन्त्रग्रन्थरचना।

सम्प्रति अस्माभिः बुध्यते ग्रन्थः खलु पुस्तकम् यत् मुद्रणेन अथवा विभिन्नमाध्यमेन प्राप्यते। ऊनविंशशताब्द्यां मुद्रणयन्त्राविष्कारात् परं पृथिव्यां ग्रन्थस्य विस्तारः जातः।वर्तमाने पुनरपि गणकयन्त्राविष्कारेण मुहूर्तेन व्यापकरूपेण स पृथिव्यां विस्तीर्यते।

यद्यपि ग्रन्थपाठः ज्ञानविस्ताराय भवति तथापि तेन सह अक्षरविवर्तनाय भवति। अपि च, स उन्नतलेखनपद्धत्यां व्यवहृतस्य विभिन्नद्रव्यादेः विवर्तनं ज्ञातुं साहाय्यं करोति।फलतः ग्रन्थपर्यालोचनायाः अपरः उपायः अस्ति। अधुना गणकयन्त्राविष्कारात् परं लिखितः ग्रन्थः कुत्रापि समादरं न प्राप्नोति कुत्रापि वा अप्रयोजनीयः भवति। कारणं ग्रन्थपाठात् वैद्युतिन् यन्त्रस्य दर्शकाः एव अधिकतया जायन्ते। (Google)अन्वेषणमाध्यमम् अधुना विशेषः सहायकः इति विषये कोऽपि सन्देहः नास्ति। वैद्युतिन्-माध्यमेन ग्रन्थपाठः छात्रेषु जनप्रियतां लभते विविधज्ञानं च विस्तारयति सम्भवति। सर्वे यथा ग्रन्थमुखिनः भवेयुः तथा व्याक्तिज्ञानस्य उन्नतिः भवेत्। अपि च, सामाजिकीउन्नतिः भवेत् तथैव देशस्य समृद्धिः भविष्यति इति सर्वैः काम्यम्।

परिशेषे एतत् अपि कथ्यते यत् यद्यपि ग्रन्थस्य गुणाः अधिकायेव,तथापि ग्रन्थः व्यवसायिभिः वन्दीभूतः ग्रन्थहरणम् अत्यन्तं पुराकालीनः व्यापारः। ग्रन्थं कृत्रिमं कृत्वा मुद्रणं अपिच ग्रन्थस्य विषयं हृत्वा उपाधिलाभः महत् पण्यम्। अतः छात्राः ग्रन्थस्य विभिन्नं विषयं तस्य विवर्तनं इतिहासं च ज्ञात्वा सचेतनाः भवेयुः इति वर्तमानप्रबन्धस्य एकं दिग्दर्शनम्।

# स्वामि-विवेकानन्दः

शुभम-चक्रवर्ती

रत्नप्रसविनीयं वङ्गभूमिः। अत्रत्यविश्ववरेण्यां महापुरुषाणाम् आविर्भावेन धन्या जाता वङ्गभूमिः। महापुरुषेषु अन्यतमः योगिवरः वीरनन्दनः स्वामि-विवेकानन्दः। १८६३ खीष्टाब्दे जानुयारीमासस्य द्वादशदिनाङ्के उत्तरकलिकाताया दत्तवंशे स जन्मग्रहणं कृतवान् । तस्य पिता विश्वनाथ-दत्तः, माता च भुवनेश्वरी देवी। शैशवात् परमेश्वरविषये तस्य महती जिज्ञासा आसीत्। परवर्तिकाले भगवतः श्रीरामकृष्णस्य सान्निध्येन सर्वे संशयाः अपगताः। स सकलशास्त्रेषु पण्डितः आसीत्। शिक्षाविषये तस्य महती धारणा हि-“Education is the manifestation of perfection already in man.” इति। संस्कृतस्य व्याकरण-काव्य-दर्शन-वेदादिविषयाः तेन सम्यग् अधीताः। संस्कृतेन तेन पत्र-द्वयमपि लिखितम्। अतः संस्कृते विवेकानन्दस्य महद् अवदानं वर्तते।

स्वामि-विवेकानन्देन संस्कृतभाषाया सप्त स्तोत्राणि स्वयमेव रचितानि। तत्र स्तोत्राणि त्रिधा विभज्यन्ते - १) शिवस्तोत्रम् २)अम्बास्तोत्रम् ३) श्रीरामकृष्णस्तोत्रं चेति। श्रीरामकृष्णविषये पञ्च स्तोत्राणि रचितानि।

१.शिवस्तोत्रम्=

शिवस्तोत्रे षट् श्लोकाः सन्ति।अत्र जन्म-जन्मान्तरबन्धनं त्रोटयितुं कविः प्रार्थयति-

“निखिलभुवनजन्मस्थेमभङ्गप्रवाहः
अकलितमहिमानः कल्पिता यत्र तस्मिन् ।
सुविमलगगनाभे त्वीशसंस्थेऽप्यनीशे
मम भवतु भवेऽस्मिन् भासुरो भावबन्धः” ।।इति ।

इह खलु संसारे यः कोऽपि सर्वमपि परस्मै समर्प्य परप्रेम्णा समर्पणभावनया शिखराधिरूढ़े द्वैवभावे महादेवत्वं प्राप्नोति इति स्वामिनः वचनं स्वरणीयमेव । पूर्वजन्मसंस्कारवशादेव जननमरणचक्रे कर्मबन्धने च जीवः निपतति। ततः निर्विकल्पकसमाधिना परमेश्वरं लब्धुम् इच्छति।अगणनकर्मबन्धनरूपे

विविधभाववृत्तिसंस्कृतिभिन्ने शरीरे यदा चित्तवृत्तिनिरोधपूर्वकसाधनावशाद् विकारः शान्तो भवति, तदा एव ईश्वरप्राप्तिः सुलभा इति प्रतिपादितम् ।

२)अम्बास्तोत्रम् =

अम्बास्तोत्रं सप्तश्लोकैः निबद्धम्। अत्र मातुः स्तुतिः विहिता। स्वामिविवेकानन्दः विश्वसर्जने अपरप्रयत्नरूपां मातरं परिचेतुं प्रयत्नपरः भवति, अन्ते च सफले अफले वा सा एकैव गतिः मुक्तिः भाग्यविधात्री इति मन्यते । तथा हि कथ्यते-

“का त्वं शुभेशिवकरे सुखदुःखहस्ते
आघूर्णितं भवजलं प्रवलोर्मिभङ्गैः ।
शान्तिं विधातुमिह किं बहुधा विभग्नां
मातः प्रयत्नपरमासि सदैव विश्वे ” ।।इति ।

कदाचिद् इयं धात्री,अन्यत्र शुभाशुभफलप्रदात्री,पालयित्री, विधात्री च। सा आदिशक्तिरेव कवेः ध्यानगोचरीभूता वर्तते । स्वामिपादः देव्या महिमवर्णनेन स्वीयम् असामर्थ्यमेव प्रकाशयति स्म ।

३)गुरुबन्धना=

गुरुकृपया एव विवेकानन्दस्य सर्वं सिद्धं भवति। स गुरुवरेण्यं श्रीरामकृष्णदेवं सर्वधर्मसंस्थापकरूपेण अवतारपुरुषरूपेण प्रतिष्ठापयति। तदुक्तम्-

“स्थापकाय च धर्मस्य सर्वधर्मस्वरूपिणे ।
अवतारवरिष्ठाय रामकृष्णाय ते नमः” ।।इति ।

श्रीरामकृष्णस्य पञ्चभिः स्तोत्रैः गुणकीर्तनं विहितं विवेकानन्देन। तत्र रामस्य कृष्णस्य च उत्तरावताररूपेण नरदेवरूपेण च तं प्रतिपादयति । अपरस्तोत्रे ‘श्रीरामकृष्ण एव शरणम्’ इति प्रतिपाद्यते। तदुक्तम्-

“तस्मात्त्वमेव शरणं मम दीनबन्धो ।इति ।

देहात्मवादिनः मूढा आत्मनः क्षीणान्, दीनान् मन्यन्ते। परन्तु रामकृष्णभक्ता आस्तिकाः आत्मनः वीरान् गतभयान् मन्यन्ते । संसारत्यागिनः स्वार्थसिद्धं विहाय श्रीगुरुचरणं ध्यायन्ति।

परिशेषे एतदेव कथ्यते यत् - भारतीयजनसमाजे स्वामिविवेकानन्दस्य स्तोत्रसाहित्यस्य अप्रतिमः प्रभावः परिलक्ष्यते। अपि च, श्रीरामकृष्णतत्त्वस्य प्रसाराय प्रचाराय च विवेकान्दस्य स्तोत्रसाहित्यं श्रेष्ठत्वं भजते।

# উন্মাদ ধরণী

অনুপ কুমার মণ্ডল- প্রাক্তন ছাত্র

পৃথিবী উত্তাল উন্মাদ হাহাকারে ঢাকা।
ধরণীর বুকে শুধু বিভীষিকাময় শব্দ ।
মানব জাতি নিস্তেজ নিঃশব্দে আবৃত ।
মহাসমুদ্রের পাড়ে একাকী শরীরে ,
জীবন কাটছে গভীর অন্ধকারে ।
সায়রের পাড় থেকে একটাই প্রতিধ্বনি,
হে পৃথিবী ! তুমি সুস্থ হও ।
মরুভুমিতে মরুদ্যান আশ্বাস দেয় ।
আন্টার্টিকায় পেঙ্গুইন সাবলীল ।
সমস্ত ভূখন্ডে মানব জাতি আজ
নিরাকারের কাছে জানাচ্ছে আরজি ।
থ্যালাসেমিয়া ক্যান্সার আজ ধ্বংস মুখে ।
মনুষ্য জাতি উচ্চ নিনাদে ক্রন্দন করছে ।
হে মারণ রোগ ! তুমি ধরণীকে সুস্থ করো ।।

# মেয়েদের আসল বাড়ি

জবা দাস , প্রাক্তন ছাত্রী

বিশটা বছর আগলে রেখে মানুষ করল যারা ,

সমাজ একদিন চিনিয়ে দেয় অচেনা মানুষ ওরা ।

যে মেয়েটি মায়ের কাছে করত শত বায়না ,

এখন একছুটে তার মায়ের কোলে ছুটে আসা হয় না ।

পেরোতে হয় তাকে অনেক অনুমতির দেয়াল ,

তার আবদারগুলো কেউ শোনেনি কেউ রাখেনা খেয়াল ।

বাপের বাড়ি থেকে যেদিন বিদায় দিল তাকে,

স্বামীর ঘর এসে ভাবল পেলাম বোধহয় নিজের বাড়িটাকে ।

কিন্তু , এই বাড়িতে এসেও সে পেলনা স্বাধীনতা ,

কেউ কি তোমার খুঁজে দেবে মেয়েদের আসল বাড়ি কোথায় ???

# YOUR BEST

SUMONA DEOYALI,PAST STUDENT

IF YOU ALWAYS TRY YOUR BEST
THEN YOU'LL NEVER HAVE TO WONDER
ABOUT WHAT YOU COULD HAVE DONE
IF YOU'D SUMMONED ALL YOUR THUNDER
AND IF YOUR BEST WAS NOT AS GOOD
AS YOU HOPED IF WOULD BE
YOU STILL COULD SAY-
*"I GAVE TODAY ALL THAT I HAD IN ME"*

pngtree.com

# কামনা

সাবানা খাতুন,তৃতীয় বর্ষ

আমি যা ভাবি তা কেন নয় ?
যা আমি ভাবি না তাই কেন হয় ?
কেন হয় এমন টা যা উচিত নয় হওয়া ?
ভগবান আজ এমন হাজারো প্রশ্ন আমার,
দাড়িয়ে আপনার দোয়ারে।
চাই আজই এখুনি সমস্ত প্রশ্নের উত্তর আমার ,
চাই সমস্ত দুর্বিপাক থেকে মুক্তি আমার ,
চাই একটু শান্তি , হাজারো চেঁচামেচি মাঝে ।
চাই করতে শেষ জীবনের পথচলা ।
চাই ভাবতে ভাবতে করতে শেষ আমার ভাবার বেলা।
চাই এটুকু আমার , যা দিয়ে মন থেকে হাসে সবাই ।
চাই এটুকু খুশি আমার , যা করতে পারে কারো দুঃখ দুর ।
আজ শুধু এতুকুই আমার কামনা।

alamy

# দাবি

শুভম চক্রবর্তী , তৃতীয় বর্ষ

পাইনি যেসব জীবনেতে , তা নিয়ে আজ ভাবি,
অনেক কিছুই পাওয়ার ছিল ,করিনি তো দাবি ।
করলে দাবি পেতাম কিনা , ছিলনা তাও জানা ,
হয়তো পেলে , অশুল করে , নিতাম ষোলোআনা ।
ভাগ্যে যদি থাকে , তবে করতে হয়না দাবি ,
পাওয়ার হলে এমনই পেতাম।
এটাও আবার ভাবি , কপালে যা আছে লেখা,
সেটুকু পাবো জানি,
যে যাই বলুক কপালটাকে আমি ভীষণ মানি ।।

# শীতের ঝোড়ো পাতা

সুস্মিতা দাস , তৃতীয় বর্ষ ।

মেঘ জমে মনের গহীনে ,

চিলেকোঠার ঘরটার কাটে

আমার অফুরন্ত ফুরসত ,

শীতের ঝোড়ো পাতার মতো

তুমিও কথায় হারিয়ে গেলে ।

পুরনো খামের চিরকুট গুলোয়

আজও বন্দি কিছু অব্যক্ত অনুভূতি ।

বেনামী সম্পর্কের স্মৃতিমেদুর

কতো গল্প হারায়

বিষাক্ত নিকোটিনের ধোঁয়ায় ।

ক্লেশ জর্জরিত অন্যদেশে

তাই উপসম খোঁজে

ভাঙা ঘুলঘুলির ফাঁকে ,

এক চিলতে রোদ্দুরে ।।

# সময়ের মূল্য

অহনা নন্দন, দ্বিতীয় বর্ষ

মানুষের জীবনে সময়ের মূল্য অনেক বেশি। তবু মানুষ বলে " নাই নাই ,নাই যে সময়।। মানুষ চায় নিজের জীবনের সমস্ত কাজ অল্প সময়ে শেষ করে, জীবনের সব থেকে চরম সুখ শান্তি ভোগ করতে। কিন্তু জীবনে আকাশের কালো মেঘের মতন দুঃখ আসে তেমনই সময়ের সাথে সেই কালো মেঘ কেটে রৌদ্র কর উজ্জ্বল করে সুখ আমদের জীবনে ভেঙে পড়তে নেই সব সময় ভরসা রাখতে হয় সময়ের উপর । "জীবনের মূল্য আয়ুতে নহে ,কল্যান ময় কর্মে ।" কে কত দীর্ঘদিন বেঁচেছে তা বড়ো কথা নয়, কে জীবনে এই জগৎ এর সব থেকে মূল্য বান জিনিস সময়কে কিভাবে কাজে লাগিয়ে সেটাই আসল বিষয়। দুর্লভ এই সময়কে যে নিজের জীবনে অমূল্য করে তুলেছে সে নিজের জীবনের সাফল্য কাঠি লাভ করে এই জীবনযুদ্ধে সফলতা পায়েছে।আর যে নিজের জীবনের এই অতি মূল্যবান সময়কে অবহেলা করেছে , সে নিজের জীবনে পিছিয়ে পড়েছে। তাই কবি যোগিন্দ্র নাথ সরকার |

" সময় চলিয়া যায় নদীর স্রোতের প্রায়"

যে জন না বুঝে , তার ধিক্ শত ধিক্।"

তাই এই ধরাধামের প্রত্যেক মানুষের উচিৎ সময়ের মূল্যকে বুঝে সেটা সকর্মে ব্যবহার করে নিজের জীবনযুদ্ধে জয়ী হওয়া ।

# বীণাপাণির বিজয়রথ

সমীরণ মণ্ডল, প্রথম বর্ষ

নীলচে আকাশ কুয়াশা জড়ানো ধূসর চাদরে গায় ,
শিশির বিন্দু হঠাৎ উজ্জ্বল ভোরের প্রথম আভায়।
শীতের রাত্রি আর্তজামিনী চলল ঘুমের দেশে ,
নি কোনও উঠোন স্তব্ধ মধুর কেউ আগুনের পাশে ।
সোনালী মাঠের আশাভরা ডাকে কেউ কিছুটা ব্যস্ত ,
উষার পৃথিবী মৌন মুখর শীতের শাসনে ত্রস্ত ।
কুয়াশা সরিয়ে রোদ্দুর মেখে শীতের সকাল আসে,
তৃপ্ত বাঙালি উচাটন নলেনের সুবাসে ।
আমলকি আর কাঁঠালের বুকে সবহারা হাহাকার,
সরষের খেত রোদে ঝলমল , অনাবিল নিরাকার ।
গাঁদার মালায় বং আলা মরশুমিদের হেমঝারি ,
সঞ্চারিছে শিরায় শিরায় , রূপ বাহারের সঞ্চারি ,
হঠাৎ বলাকা দৃপ্ত কেমন , আসে ঐ আসে ও
রঙের বাহার রঙ হারা কেন রাঙনের নদীর তীরে ,
বৃক্ষ কেন শুভ্রে মুগ্ধ আগমনীর আভাস কেন ?
প্রকৃতির বুকে কার আগমনী ? মউ-পিয়াসীর গুঞ্জরন ,
প্রজাপতির পাখায় পাখায় বেনুর সুরে কার আগমন ।
কৃষ্ণপক্ষ নিশীথিনির মলিন , কালিমা বিষাদ মুছে ,
ছেলেবেলা মুখে উদাস সুরে কোন সুন্দরের বেনু বাজে ।
শুক্লপক্ষ ঐ যে আসে , মহাশ্বেতার আয়ন পথ,
ছড়িয়ে আলো কেতন ওড়ায় বীণাপাণির বিজয়রথ।

# কোয়ারান্টাইন

ফয়জুল্লা সরদার , দ্বিতীয় বর্ষ

এ কয়েকটা দিন প্রিয় তুমি
ধৈর্য্য ধরে থেকো ,
কষ্ট হলেও নিজেকে ঘরে
বন্দী করে রেখো ।
দেখা যদিও হবেনা তবে ;
খোঁজ টা রাখবো রোজ ,
ইচ্ছাকৃত কখনো প্রিয়
হবো না নিখোঁজ ।
তুমি আমার অতি আপন
তাইতো বলছি প্রিয় ,
করোনা এড়াতে এ কটা দিন
ঘরে থাকাই শ্রেয় ।।

# আমি একটি কন্যা ভ্রূণ

সুপর্ণা গায়েন , প্রথম বর্ষ

হে মানুষ , কেমন তোমরা ?
কেমন তোমাদের সমাজ ? দেখলাম আজ।
১৫ ই জুন আমি রক্তের ছোটো কণার মধ্যে
মায়ের জরায়ুর সঙ্গে সংযুক্ত হয়েছিলাম।
তক্ষণও তৈরি হয়নি আমার শরীর , অঙ্গ-প্রত্যঙ্গ ,
১৭ ই জুন আমি পরিণত হয়েছিলাম ছোট্ট একটি মাংসপিণ্ডে !
তখনও রক্ত চলাচল করেনি আমার হৃদপিণ্ডে !
৩০শে জুনের পর থেকেই মায়ের শরীর হতেই
পেতে থাকলাম খাদ্য ও পুষ্টি ।
১৫ই জুলাই মা বাবাকে আমার কথা জানিয়েছিল ;
মা-বাবা দুজনেই খুব খুশি ছিল ।

১৫ই সেপ্টেম্বর আমার নিজের মধ্যে
হৃদস্পন্দনের অনুভূতি পেয়েছিলাম।
জীবনের স্পন্দন প্রান ভরে অনুভব করেছিলাম ।
১৪ই অক্টোবর আমার দুটো ছোট ছোট হাত ও পা তৈরি হয়েছিল ।
নিজের ছোট শরীরটাকে যতটা সম্ভব গুটিয়ে রেখে,
অতি কষ্টে মায়ের গর্ভে ছিলাম অপেক্ষায়,
চাপা উত্তেজনায় চঞ্চলতায়
ছটফট করছিলাম , পৃথিবীর আলো দেখার জন্য ।

মনে হয়েছিল পৃথিবীটা কত না সুন্দর , কত না অনন্য ।
১৩ই নভেম্বর আমার  আল্টা সোনোগ্রাফি করানো হয়েছিল
ওহ !!

১৫ই নভেম্বর আমার বাবা-মা আমাকে হত্যা করল!
পৃথিবীর আলো দেখবার বড়ই ইচ্ছা ছিল আমার ,
কিন্তু হায় ! দেখা হল না আর ।
হে মানুষ , কেমন তোমরা ?
কেমন তোমাদের সমাজ ? দেখলাম আজ ।
পৃথিবীতে আসার আগেই তোমাদের কাছ থেকে পেলাম আঘাত ।
কন্যা সন্তান আমি , এটাই কি ছিল আমার একমাত্র অপরাধ ??

# অচেনা প্রেম

মাসুমা পারভিন

আমি স্টেশনের পথ দিয়ে যাচ্ছি।
দেখলাম একটা অচেনা পথ,
একটা অচেনা মেয়ে দাড়িয়ে ,
সে খলখল করে হাসছে।
তার হাসি যেন কথা বলে যায়।
তার টোল পড়া গাল,
তার রেশমি চুলের বাহার,
আমার মন ছুঁয়ে যায়।
তাকানো সেই চোখের ভাষা,
আমি দূর থেকে দেখেছি তাকে।
মনে হয় ছুটে যাই ,বলি তাকে
কি নাম তোমার?
আমি তার কাছে যেতে যেতেই
ইস তার ট্রেনে সে দৌড়ে চলে গেল
তার কামরাতে।
এখন পাঁচিশ বছর হয়ে গেল
তবুও
তার টোল পড়া মুখের হাসি
আমার হৃদয়ের মাঝে আজও যেন
ঝঙ্কারের মতো বেজে ওঠে ,
ঝং ঝং ঝং ঝং শব্দে।
আমাকে পাগল করে দেয় মাঝে মাঝে।

# পৃথিবীটা কেমন

হিরন্ময় মন্ডল, প্রথম বর্ষ

পৃথিবীটা যেন , কেমন !
কিচ্ছু ঠিক নেই ।
কোথাও শান্তি নেই ।
হাহাকার আর হাহাকার ,
রাত কাটে ভয়ে ভয়ে ,
বিশ্রাম আর হয়ে ওঠেনা।
হঠাৎ দেখি পুলিশ বাহিনী ,
হঠাৎ শুনি বোমার শব্দ ।
কাকে দেখি টেনে নিয়ে গেল,
কোথাও আবার হত্যা কান্ড।
সত্যি ! কি নির্মম কি নির্দয় ওরা
নিমেষে হাত কাঁপেনা
বুকের ভিতর মারতে ছোঁড়া ।
না না কিচ্ছু ঠিক নেই ।
কোথাও শান্তি নেই ।
কতদিন চলবে এসব ?
কত রাত কাটবে ভয়ে ?
কত লোক মরবে এমন ?
গুলি আর বোমার ঘাঁয়ে ।।

# আক্ষেপ

সুমাত্রা কয়াল,প্রথম বর্ষ

ব্যস্ততা তুই ফিরে আয়..
দেখ কত আক্ষেপে দিন কেটে যায় !!
সময় তুই আজ স্থির বড়ো
সম্পুর্নতা তুমি আজ জেদ ধরো
তোমার সাথেই আমার পথ বাঁধব আজ ..
ব্যস্ততা তুই ফিরে আয়
দেখ, কতো আক্ষেপে দিন কেটে যায় !!
খুশির হাওয়া আজ ঘুম ওড়ায়,
স্মৃতি গুলো ভেঙে দিয়ে যায়
বাক্স বন্দী যত স্বপ্ন ছিল আজ
কাল চায় সে বধূ সাজ।।
রাস্তা চেনা আজ তোর পথ ধরেই
আজ আমি হাঁটছি একা দেখ
শুধু স্বপ্ন একটাই আজ
কাল বোধ হয় সাজাবে তোর
ব্যস্ততা তুই ফিরে আয়
দেখ কতো আক্ষেপে দিন কেটে যায় !!

alamy

# মা আমার মা

সুস্মিতা বারিক,প্রথম বর্ষ

আমি যখন ছোটো ছিলাম
মায়ের কোলে শিশু
ঠিক যেন মা মেরীর কোলে
ছোটো একটা যীশু ।
যখন আমি হাঁটতে শিখি
টালমাটাল পায়ে
বুকে তখন ধরেন
পরম স্নেহের মা ।
আমি যখন বড় হলাম
তখন মায়ের স্নেহ
জীবন ভরে পেয়ে গেলাম
বুঝবে কি আর কেউ ।
মায়ের কাছে আমার জীবনে
প্রথম পাঠ শুরু
তিনিই আদি অন্ত আমাদের
তিনিই প্রথম গুরু ।
মা আমাদের জীবন পথে
জ্বালিয়ে দেন আলো
সেই আলোতে জীবন রথে
এগিয়ে চলা ভালো ।।

# নারী

মিতা মন্ডল, প্রথম বর্ষ

নারী তুমি দুর্বল নও
মা কালির অংশ হও ।
মেয়ে তুই পুতুল না
মুখ বুজে তুই থাকবি না ।
নারী তুমি বোঝা নও
নিজেকে শক্ত করো ।
মেয়ে তুই কুৎসিত নও
শ্যামা মায়ের শক্তি হও ।
সমাজ তুমি দমিয় না
পাখির মতো উড়তে দাও ।
কষ্ট তুমি হেসো না
সুখটাকেও রুখে দাঁড়াতে দাও ।
সত্য কঠিন হলেও
মিথ্যাকে মাথা নত করতেই হবে ।
নিষ্ঠ তুমি এমন করো
অপরাধ যেন মাথা নত করে ।।


सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।।
May all be happy,
May all be healthy,
May all see what is good,
May all be free from suffering.